RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484

॥ ओ३म् ॥

काल: पचति भूतानि
काल: संहरते प्रजा:।
काल: सुप्तेषु जागर्ति
कालो हि दुरतिक्रम:॥

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवाद:

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥

न पश्यति च जन्मान्ध:
कामान्धो नैव पश्यति।
न पश्चति मदोन्मत्तो
ह्यर्थी दोषान् न पश्यति॥

( चाणक्य-नीति )

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

卐 वर्षम्-८ 卐 अंक:-९ ( १७७ ) 卐 १ नवम्बर: २०१८ त: १५ नवम्बरमास: २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८

## महामहिमराष्ट्रपति कृतवान् अन्ताराष्ट्रियार्यसम्मेलनस्योद्घाटनम्

नवदेहली। राष्ट्रपति रामनाथकोविन्द: चतुर्दिवसीय आर्यसभाया: अन्ताराष्ट्रिय आर्यमहासभाया उद्घाटनं कृतवान। एवं तत्र प्रचल्यमान शिक्षा विषयोऽपि उक्तवान। ते उक्तवान यत् अंधविश्वास: कुरीति एवं महिलासशक्तिकरण सह आधुनिक चिन्तनेन सह दयानन्दस्य संकल्पं अग्रेसारणाय



उक्तवान। ते उक्तवन्त: राष्ट्रपिता गाँधी अपि स्व आन्दोलने दयानन्दस्य मतानां अनुसरणं कृतवन्त:। 19वीं शताब्द्यां दयानन्द: महिला सशक्तिकरणे बलं दत्तवान। अद्य महिला आन्दोलने तेषां आन्दोलनस्य प्रभाव: दृश्यते। अद्यस्मिन् समये राष्ट्रपति आर्यसमाज सर्वाधिक प्रासंगीकमुक्तवान। ते उक्तवन्त: आर्यसमाज: पंथ, सम्प्रदाय-जाति बंधनेन स्वच्छन्द: कारयति। विश्वगुरू रूपे स्थापना तेषां कथनस्य अनुसरणम् आवश्यकं वर्तते। अस्मिन्नवसरे राष्ट्रपति कोविन्द: एवं केन्द्रियमंत्री हर्षवर्धन, सत्यपाल सिंह, हिमाचलप्रदेशस्य राज्यपाल आचार्यदेवव्रत, सिक्किमप्रदेशस्य राज्यपाल गंगाप्रसाद, सार्वदेशिक आर्य प्रतिनिधि सभाया: सुरेशचन्द्रआर्योऽपि सम्बोधितवान।

## देववाणीपरिषदा एकत्रिंश: पण्डितराजमहोत्सव: समायोज्यत

नवदेहली। 24.10.2018 तमे दिनाङ्के शरत्पूर्णिमायां 2075 तमे वैक्रमाब्दे वाणीविहारस्थे रमालये दिल्लीस्थया देववाणीपरिषदा एकत्रिंश: पण्डितराजमहोत्सव: समामानित:। पण्डितराजमहोत्सवेस्मिन् आचार्याय डा. इच्छारामद्विवेदिने 'प्रणवमहाकवये' ऐषम: पण्डितराजसम्मान: अभ्यर्पित:। कार्यक्रमेस्मिन् मुख्यातिथिरूपेण




कैथलस्थ-वाल्मीकिसंस्कृतविश्वविद्यालयस्य कुलपतय: डा. श्रेयांशकुमारद्विवेदिन: उपस्थिता अभूवन्। परिषत्संरक्षिकाया: श्रीमत्या रमाशुक्लाया: सान्निध्ये परिषदध्यक्षेण आचार्यरमाकान्तशुक्लेन मुख्यातिथिना डा. श्रेयांशकुमारद्विवेदिना च प्रणवमहाकवये आचार्यद्विवेदिने सम्मानपत्रम् , ऊर्णावस्त्रम् , एकादशसहस्त्रराशिश्च समर्पिता:।

शेषभाग:द्वितीयपुटे

## लौहपुरुषसरदारबल्लभभाईपटेलस्य सर्वोच्चभव्यप्रतिमाया: लोकार्पणम्



नवदेहली। गुजरात राज्ये पवित्र नर्मदा नद्या: तीरे भारतस्य राजनीते: शिखरपुरुष सरदारपटेलस्य सर्वोच्च प्रतिमाया: लोकोर्पणं प्रधानमंत्री नरेन्द्रमोदी कृतवान। 182 मीटरस्य अस्या: प्रतिमाया: अनावरणं सरदार पटेलस्य 143वीं जयन्ती अवसरे कृतवान। प्रधानमंत्री मोदी सरदारपटेलं देशस्य ऐक्यता, अखण्डता एवं सार्वभौमिकताया: प्रतीक: उक्तवान। अनावरणात् पूर्वं तत्रेस्थित शिवलिङ्गस्य अभिषेकं त्रिंशत् ब्राह्मणस्य मंत्राच्चारणेन कृतवन्त:। अनावरणान्तरं प्रतिमायां वायुसेना एम.आई-17 यानेन पूष्पवर्षा कृतवान। तेषां प्रतिमाया: लोकार्पण स्वस्य सौभाग्यं कथयित्वा उक्तवन्त: यत् सरदारपटेल: स्वतन्त्रताया: पश्चात् देशं 550 इतोधिक राज्यं ऐक्यं कृत्वा अखण्ड भारतस्य निर्माणं कृत्वा स्व दूरदर्शिताया: प्रमाणं दत्तवन्त:। तं स: सम्मानं अवश्यमेव भवितव्यम् यस्य ते अधिकारी आसन्। भारतस्य अस्य स्वर्णिम पूत्रस्य प्रतिमा निर्माणे वयं प्रत्येकस्मिन् कृषकस्य सहयोगं प्राप्तवान। अयं योगदानं सदा विस्मरणीयो भविष्यति। अस्मिन्नवसरे मुख्यमंत्री विजयरूपाणी, भाजपा अध्यक्ष अमितशाह व प्रतिमाया: शिल्पकार राम.वी.सुतार अपि उपस्थिता: आसन्।

## वेदा: जीवनस्य संकल्पा: मन्तव्या: -बाबारामदेव:

नवदेहली। देहल्यां आयोजित अन्ताराष्ट्रिय आर्य महासम्मेलने बाबा रामदेव: ओजस्वी एवं सारगर्भित व्याख्यानं दत्तवन्त:। ते अक्तवन्त: वेद: केवलं अवगमनाय नास्ति अपितु आचरणस्य विषयोऽस्ति। वेदान् जीवनस्य संकल्प: निर्मितव्यम्। ते महासम्मेलने समागत लक्ष्याधिक आर्यानां आह्वाहनं कृत्वा उक्तवन्त: यत् एक: वृहद् कार्ययोजनाया: अन्तर्गतेव वेदस्य संदेशं सम्पूर्ण



प्रपञ्चे प्रकाशितुं शक्यते। संस्काराणां स्थापना एवं स्वतन्त्रताया: युद्धे ते आर्य समाजस्य महत्वपूर्णं भूमिकाया: उल्लेखं कृत्वा उक्तवन्त: यत् देशे यदा-यदा अन्धविश्वास एवं नकारात्मक शक्तय: प्रभावशाली भवति तदा महर्षि दयानन्दस्य सन्देश: एवं आर्यसमाज तस्य निराकरणं करोति। अस्माकं अतीतस्य गौरवं अस्मान् रक्षयति। आर्यपूत्र कथने गौरवं अनुभवन्तु 100 अस्मान् वेदानां संकल्पेन सह ''स्वदेशी'' इति विचारं अपि आत्मसात् करणीयम्। विश्वस्य अर्थव्यवस्थां केचन चालयनित ते भारतस्य उन्नत्यां बाधकोऽस्ति। अस्मान् विचारस्य स्तरेऽपि वैदेशिक विचारधारां व्यक्तव्यम्। असम्मिन्नवसरे महासम्मेलनस्य आयोजन समिते: अध्यक्ष महाशय धर्मपालं आर्यजगतस्य ''आर्यरत्न'' सम्मानेन सम्मानितं कृतवान। तत्र हिमाचलप्रदेशस्य राज्यपाल आचार्य देवव्रत, सुरेशचन्द्रआर्य, प्रकाशआर्य, गंगा प्रसादजी एवं विनय आर्य मंचोपरि आसन्।

# आदिकवेर्महर्षेर्वाल्मीकेर्जयन्त्यवसरे विविधसंस्कृतप्रतियोगितायाः आयोजनम्

लक्ष्मणपुरम्– महर्षिवाल्मीमिजयन्त्यवसरे उत्तरप्रदेशसंस्कृतसंस्थानेन आदिकवेमहर्षेर्वाल्मीकेर्जयन्त्यवसरे विविधाः संस्कृतप्रतियोगिता आयोजिताः, यत्र गीतवादभाषणश्लोकान्त्याक्षीप्रतियोगिताः प्रमुखा आसन्। सम्पूर्णोत्तरप्रदेशात् संस्कृतच्छात्राः



प्रतियोगितासु भागमगृह्णन्। विजेतृभ्यः संस्थानद्वारा पुरस्काराः प्रदत्ताः। सायं संस्कृतकविसमवायः समायोजितः। यत्र विश्वकवयः प्रोः अभिराजराजेन्द्रमिश्रमहोदयाः अध्यक्षा अभूवन्। कविवरा उमाकान्तशुक्लाः, महामहोपाध्यायाः डॉ रमाकान्तशुक्लाः, प्रो ओमप्रकाशपाण्डेयाः, प्रो आजादमिश्रः, प्रो वृजेशशुक्लः, डॉ श्रेयांसद्विवेदी, प्रो वागीशशास्त्री, डॉ नवलता, डॉ कमलापाण्डेया, प्रो रामसुमेरयादवः, श्रीलालमणिपाण्डेयः, प्रो द्वारिकानाथत्रिवपाठी, श्रीकेशवगुप्तः,डॉ विजयकर्णः, हास्यकविः प्रशस्यमित्रशास्त्री, डॉ अरविन्दनारायणमिश्रः, श्रीसुरेन्द्रत्रिपाठी, डॉ शिवप्रसादत्रिपाठी, डॉ कीर्तिवल्लभशाक्टामहोदयः, श्रीप्रेमशंकरशर्मा डॉ अरविन्दकुमारतिवारी अन्ये च सुकवयः काव्यपाठैः लक्ष्मणपुरी पिच्छिला कृता। संचालनं अरविन्दकुमारतिवारिणा काव्यमयं कृतम्। आरम्भे संस्थानस्य अध्यक्षमहोदयाः डॉ वाचस्पतिमिश्राः समेषामपि सुकवीनां सांगवस्त्रं सपुष्पं सप्रतीकचिह्नं सुस्वागतं कृतवन्तः। सर्वेषां महाकवीनां करकमलैः डॉ अरविन्दकुमारतिवारिविरचितयोः वरिवस्यायोगिचरितयोः काव्ययोः लोकार्पणं विहितम्। अस्मिन् अवसरे डॉ कीतिवल्लभशाक्टामहोदयेन विरचितं काव्यमपि लोकार्पितम्।

# पण्डितप्रतापनारायणमिश्रस्मृतियुवसाहित्यकार–सम्मानसमारोहः

20.10.2018 तमे दिनाङ्के लखनऊस्थेन भाऊरावदेवरससेवान्यासेन चतुर्विंशः पण्डितप्रतापनारायणमिश्रस्मृतियुवसाहित्यकारसम्मानसमारोहः समायोज्यत। सम्मानसमारोहेह्यस्मिन्



भाऊरावदेवरससेवान्यासेन षट् साहित्यकाराः सम्मानिताः येषु काव्ये सुश्रीः आफरीन (मुरादाबादात्) , कथासाहित्ये श्री–अभिषेक–लाडगेः (भोपालात्) , बालसाहित्ये श्रीशिवमोहनयादवः (कानपुरात्) , संस्कृते डा. ऋषिराजपाठकः ( दिल्लीतः ) , पत्रकारितायां श्रीअभिषेकशर्मा ( फैजाबादात् ), बाङ्गलायां च डा. राकेशदासः ( कोलकातायाः ) समाविशन्ति। साहित्यकारेभ्यः सम्मानरूपेण ऊर्णावस्त्रम्, सरस्वतीप्रतिमा, स्वस्तिकस्मृतिचिन्हम्, सम्मानप्रमाणपत्रम्, दशसहस्त्ररुप्यकराशिश्च उपायनीकृताः। कार्यक्रमस्य संयोजनंविजयकुमारकर्णमहाभागेन कृतम्।

**प्रथमपुटस्य शेषभागः**

## देववाणीपरिषदा एकत्रिंशः ...

आचार्या इच्छारामद्विवेदिनः 15.11.1961 तमे दिनाङ्के उत्तरप्रदेशस्य इटावायां जनिम् अलभन्त। प्रणवमहाकविभिरेभिः गीतमन्दाकिनी, प्रश्नचिन्हम्, समुज्ज्वला, सत्प्रेरणानाटकम्, मित्रदूतम्, दूतप्रतिवचनमृ, प्रणवभागवतम्, इत्यादयो नैके काव्यग्रन्थाः प्रणीताः। पुराणपीयूष–सुरभारती–वैशारदीप्रभृतयः पत्रिकाश्च संपादिताः। इमे हि भागवतपुराणस्यापि प्रवचनकर्तारः सन्ति। दिल्लीस्थस्य श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य पुराणेतिहासविभागे अध्यक्षाः प्रणवमहाकवयः देववाणीपरिषदोऽपि अध्यक्षपदम् अलङ्कृतवन्तः सन्ति।

कार्यक्रमेह्यस्मिन् आचार्यरमाकान्तशुक्लेन पण्डितराजजगन्नाथस्य व्यक्तिमत्त्वं कृतित्वं वर्णयता तस्य गङ्गां मातरं प्रति भक्तिविषयोऽपि विशिष्य चर्चितः। अथचोक्तम् यत् गङ्गायाः निर्मलीकरणाय, अविरलप्रवाहाय च प्रेरयन्ती गङ्गालहरी सदा प्रासङ्गिकी। अत्रावसरे रम्या, शुभाङ्गी, वरदशुक्लः, प्रवीणरायश्च श्लोकपाठमकुर्वन्स्। पण्डितराजमहोत्सवरजतजयन्तीस्मारिकायाश्च वितरणमभूत्। समुपस्थितैश्च सर्वैः गङ्गालहरीपद्यानां पाठः कृतः। कार्यक्रमस्य संचालनं मुनिराजपाठकेन कृतम्।

# साहित्य–अकादमीद्वारा अखिलभारतीययुवलेखकमहोत्सवस्यायोजनम्

इम्फालतः– अक्टूबरमासस्य 26दिनांकतः 28दिनांकं यावत् मणिपुरस्य राजधान्यां साहित्य–अकादमीद्वारा अखिलभारतीययुवलेखकमहोत्सवः समायोजितः। अत्र विंशत्यधिकभाषासु युवपुरस्काराः प्रदत्ताः। विभिन्नभाषाभाषिभ्यः तेषां रचनायै अयं पुरस्कारः प्रादीयत। अस्मिन्नवसरे






सवैरपि पुरस्कष्तैः स्वानुभवः श्रावितः। यदनन्तरं अकादम्याः उपाध्यक्षाः श्रीमाधवकौशिकमहोदयाः सर्वमपि निशम्य सम्बोधितवन्तः। तैरुक्तं यत् लेखनयात्रा सवैरपि अग्रेसारणीया जीवने। अकदाम्याः सचिवेन केश्रीनिवासरावमहोदयेन मनोहरं वचनं श्रावितम्। मणिपुरस्य संयोजकाः श्री एनकिरणकुमारमहोदयाः मनोहारिवचनैः हष्दयं जितवन्तः स्वसौजन्येन मनो हष्तवन्तश्चेति। महोत्सवे अस्मिन् विविधाः कार्यक्रमाः आयोजिताः। भारतीयभाषासु संस्कष्तादिषु सानुवादं काव्यपाठः युवकविभिः कष्तः। यं श्रावं श्रावं सर्वे मुदिता अभूवन्। कथावाचनमपि युवलेखकैः कष्तम्। समीक्षकैः वरिष्ठैर्महानुभावैः सुन्दरं ग्राह्यं भाषणं प्रदत्तम्। सत्यमेवैतत् दर्शनीयं समग्रमपि समायोजनमहरन्मनः। श्रीकिशोरत्रिपाठिमहोदयः काव्यपाठसत्रे मनोहारि संचालनं कृतवान्। ततः मान्यवरः श्रीकिरणमहोदयः स्वमनोरमवचनैः सर्वेभ्यः धन्यवादवचांसि प्रददात्।

# वर्तमानकालिकविभिन्नद्वन्द्वेषु महाभारतस्य विविधायाम विषये राष्ट्रियसंगोष्ठ्यायोजनम्

हरियाणा संस्कृत अकादमी पंचकुला एवं आर्यकन्या महाविद्यालय अंबालायाः संस्कृत एवं आंग्ल विभागाध्यमेन वर्तमानकालिक विभिन्न द्वन्दे महाभारतस्य विविधतायाः आयामः विषये एकदिवसीय राष्ट्रिय संगोष्ठ्या आयोजनयभवत् अस्याः संगोष्ठ्या अध्यक्ष राष्ट्रपति सम्मानेन



सम्मानित वेदप्रकाशउपाध्याय मुख्यातिथि आर.सी.मिश्रा (ए.जी.डी अंबालारेंज) विशिष्टातिथि हुकुमसिंहः डॉ. रामविकासमहोदय (अध्यक्ष संस्कृतभारतीय हरियाणा) डॉ. कामदेवझा, डॉ. संजय शर्मा जी आसन्। अस्याः संगोष्ठ्याः मुख्यवक्ता रूपे प्रो. राजेश्वरमिश्रः (अध्यक्ष सं.विभाग कु.वि. कुरूक्षेत्र) विशिष्ट वक्ता रूपे प्रो. वीरेन्द्र अलंकारः (पंजाब वि.वि.चंडीगढ़) डॉ. आशुतोषआङ्गीरस, डॉ.सबुद्धजी, डॉ. आर.के.गुप्ता आसन्।

डॉ.योगेन्द्रः, श्रीकृष्णलालवर्मा, कर्नलसतीशघवन, शोभायमानमासीत्। संयोजक रूपे डॉ. सुनील जी, डॉ. अनीता जी (अंग्रेजी) प्राचार्य डॉ. अनुपमोआर्या (आर्यकान्यामहाविद्यालय अंबाला) इत्येषां भूमिकां सराहनीयः आसीत्। हरियाणासंस्कृत अकादम्याः निदेशक डॉ. सोमेश्वरदत्त संरक्षक रूपे आसीत्।

# संस्कृतस्य वैभवरूपेणैव विश्वस्य नेतृत्वं करिष्यति भारतम्–योगीआदित्यनाथः

वाराणसी। मुख्यमंत्री योगीआदित्यनाथ उक्तवान यत् संस्कृतं भारतस्य आत्मा अस्ति। इदानीं इदं पौरोहित्य कार्य पर्यन्तः सिमितोऽस्ति। विज्ञानस्य सीमायाः यत्र समाप्तिः भवति तत्रतः संस्कृतस्य मार्गस्य



प्रारभ्यः भवति। भारतीकरणं नाभवत् तदर्थमेव अस्य महत्वं विषये न्युनता आगतम्। संस्कृत–भारती पक्षतः आयोजित द्वि दिवसीय अखिल भारतीय संगोष्ठयाः समापनं निवेदिता शिक्षा सदन स्कुल महमूरगंजे मुख्यातिथि मुख्यमंत्री आसन्। संस्कृत भारत समर्थभारत विषये संगोष्ठ्या देशतः 700 तः अधिक संस्कृतस्य



विद्वजनानां मुख्यमंत्री सम्मानं कृतवान एवं ते संस्कृत भागीरथी स्मारिकायाः विमोचनं कृतवान।

मुख्यमंत्री यत् भारतस्य विषये यदि अवगमनस्य इच्छा अस्ति चेत् तर्हि संस्कृतस्य ज्ञानम् आवश्यकमस्ति। विश्व मानवतायाः कल्याणं भारतस्य धरायां भविष्यति। संस्कृत पाठशाला विषये चिन्ता व्यक्तवान। 2001 तमे वेर्षे संस्कृत परिषदस्य गठनमभवत् परञ्च कार्यरूपे न आगतम्। सप्तदश वर्षानन्तरं यदा अहमागतमं तदा सर्वेषां पुनरूत्थानम् अकरोत्। संस्कृत संभाषण कार्यक्रमस्यायोजनमपि अकरोत्।

# लखीमपुरदशहरामेलायां अभवत् कविसम्मेलनम्

लखीमपुर। दशहरा मेलायां संस्कृतकवि सम्मेलनस्यायोजनमभवत्। यत्र कवय संस्कृतस्य राष्ट्रभाषा एवं विश्वस्य भाषायाः एवं स्थापितवान। संस्कृत विद्वान डॉ. सुरचनाद्विवेदीमहोदयायाः संयोजने अस्य कार्यक्रमस्य शुभारम्भः मुख्यातिथि जिलान्यायाधीश ओमप्रकाशअग्रवाल दीपप्रज्वालनेन अकरोत्। ई.




ओ.अखिलेश त्रिपाठी एवं नगरपालिका अध्यक्ष विल्पमा वाजपेयी अतिथीन् प्रतीकचिन्हेन सम्मानितवान। अत्र संस्कृत महाविद्यालयस्य प्राचार्य एवं आर्यकान्य स्नातकोत्तर महाविद्यालयस्य प्राचार्या सुरचनाद्विवेदीमपि सम्मानितवति। कुन्मुदितभवस्थि लोकशैल्यां गीतं प्रस्तुत्य कार्यक्रमस्य शुभारम्भः कृतवती।

देहलीतः सभागत पद्मश्री रमाकान्तशुल्कः राष्ट्रभाषा संस्कृतम्, विश्वभाषा संस्कृतम् गीतं



पठित्वा भावविभोरं कृतवान। अस्यातिरिक्त डॉ. रेखा शुक्ला, कृपाशंकर मिश्र, डॉ. रामसुमेरयादव डॉ. ओकारनारायणदुवे, डॉ. ओमप्रकाशपाण्डे, डॉ. नवलता, सूर्यप्रकाशमिश्र, वनवारीलालपाण्डे, राकेशत्रिपाठी एवं सुरचना द्विवेदी काव्यपाठं कृतवती। राजेन्द्रत्रिपाठी संस्कृत संगमस्य महत्वं विषये उक्तवान। डॉ. उमापतिमिश्र लक्ष्मीपुरम कथयित्वा लखीमपुरस्य महत्व विषये उक्तवान।

# सत्संगे सम्मिलितोऽभवत् शिक्षाविद्

रुड़की। न एकः सत्यम् त्वमसि नाम सत्यम् इश्वरीय मंत्रस्य दृष्टा सद्गुरूबाबा फुलसंदे दिव्य सत्संगे प्रकांड विद्वान प्रो. भरतभूषण वेदालंकर एवं उत्तराखण्ड संस्कृत अकादम्या उपाध्यक्ष प्रो.



प्रेमचन्द्रशास्त्री सेवाश्री सम्मानेन सम्मानितं कृतवान। यद्यपि स्वच्छता एवं समाज सेवायां योगदाने रमेश भटेजा, शादीलाललखनी एवं सतीशकालरा इत्यादिमपि सम्मानितवान। गुरूकुलकांगड़ी विश्वविद्यालयस्याचार्य भरतभूषणवेदालंकरः वेदस्य महत्वं, विश्व कल्याणे वेदस्य महत्ता विषये उक्तवान। अस्मिन्नवसरे राजकुमारउपाध्याय विवेककांबोज, अक्षतवीर, भावनाशर्मा, विजयलक्ष्मी, मधु, कमलभटेजा, वीनाकथुरिया अजयचौधरी, संजयचौपड़ा, प्रदीपत्यागी, भीमसेन, नरेशकपुर आसन्।

# सामाजिकोत्थाने श्रीमद्भागवतगीतायाः उपयोगिताविषये संगोष्ठी

हरियाणा संस्कृत अकादमी पंचकुला एवं महर्षि वैदिक संस्थानस्य संयुक्त तत्वावधाने इश्वर–सिंह–कान्या–महाविद्यालय पुण्डरी मध्ये सामाजिकोत्थाने गीताया उपयोगिता विषये एकादिवसीय राष्ट्रिय संगष्ठी एवं सेवारत्न सम्मान सभा रोहस्यायोजनमभवत्। अस्मिन् कार्यक्रमे मुख्यातिथि रूपे




राष्ट्रपति सम्मान्नेन सम्मानित पूर्वकुलपति सम्पूर्णानन्द संस्कृत विवि वाराणसि डॉ. अभिराजराजेन्द्रप्रसादमिश्र, विशिष्टातिथि रूपे डॉ. ललितकुमारगौड एवु मुख्यवक्ता डॉ. कामदेवझा महोदयस्य मार्गदर्शनं प्राप्तवान।

कार्यक्रमस्य संयोजक राधवाचार्य एवं संरक्षक उषातुरान आसीत्। अध्यक्षता हरियाणा संस्कृत अकादम्याः निदेशक सोमेश्वरदत्तः कृतवान।

# सम्पादकीयम्

**अयि सुरभारतीसमुपासकाः! अयि सहृदयाः!**

**अतीव दुःखकरी घटना देशे विजयादशम्यां दृष्टा। यत्र दह्यमानं रावणं पृयन्तः अमृतसरे अनेके जनाः रेलमार्गमारूढा निहताः। अहहा! किं कृतं निष्ठुरेण कालेनेति वक्तुं न पारयामि। अवश्यमेव जनैः सावधानतया द्रष्टव्यम् , यत्र कुत्रचिदपि एतादृशं समायोजनं भवेत् तत्र, न महान् समर्दः कार्यः। जीवनममूल्यमस्ति। रुदतां जनानां कन्दनं श्रावं श्रावं सर्वस्यापि करुणं हश्दयं द्रवीभूतमेवेदं विलोक्य। ईश्वरः सर्वेभ्यो दिवंगतेभ्यः शान्तिं दद्यात्, तेषां पारिवारिकसदस्यानां कृते सकरुणं स्वभावं सम्प्रेषयन्ती अहं स्मरामि कवेररविन्दस्य इमां घटनामाश्रित्य लिखितां कवितां तामेव अत्रापि श्रावयामि। यथा–**

अकालं कालरेलेन बन्धवः कवलीकृताः।
क्रन्दनं कृन्ततीवाद्य हृदयं करुणापते!
रावणं दह्यमानं ये द्रष्टुं रागात्समागताः।
निर्दोषा निहताः कस्मात्संस्थिता नाथ पालक!।
मृतान् वीक्ष्य मृतो दग्धो रावणो विलपन् ध्रुवम्।
व्यथतेऽयं दशग्रीवो निन्दन्नात्मानमात्मना।
अरविन्दः।

**अस्तु, नाधिकं वक्तुं जिह्वा कामयते मे सम्प्रति। अतः संक्षिप्य सवाष्पं ब्रवीमि ———**

**अमरवाणी विजयताम्।**

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

[१४] अथास्य द्वादशर्चस्य चतुर्दशसूक्तस्य कण्वो मेधातिथिऋषिः । विश्वेदेवा देवताः । गायत्री छन्दः । षड्जः ।स्वरः।।

अब चौदहवें सूक्त का आरम्भ है। उसके पहले मन्त्र में बहुत पदार्थों के साथ संयोग करनेवाले ईश्वर और भौतिक। अग्नि का उपदेश किया है

**ऐभिरग्ने दुवो गिरो विश्वेभिः सोमपीतये।**
**देवेभिर्याहि यक्षि च॥१॥**

अर्थ–इस मन्त्र में श्लेषालङ्कार है। जिन मनुष्यों को व्यवहार और परमार्थ के सुख की इच्छा हो, वे वायु, जल और पृथिवीमयादि यन्त्र तथा विमान आदि रथों के साथ अग्नि को स्वीकार करके उत्तम क्रियाओं को सिद्ध करते और ईश्वर की आज्ञा का सेवन, वेदों का पढ़नापढ़ाना और वेदोक्त कर्मों का अनुष्ठान करते रहते हैं, वे ही सब प्रकार से आनन्द भोगते हैं ।।१।।

*अब अगले मन्त्र में अग्नि शब्द के अर्थों का उपदेश किया है*

**आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धियः।**
**देवेभिरग्न आ गहि।।२।।**

अर्थ–इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को इस संसार में ईश्वर के रचे हुए पदार्थों को देखकर यह कहना चाहिए कि ये सब धन्यवाद और स्तुति ईश्वर ही में घटती हैं।।२।।

अब अगले मन्त्र में सब देवों में से कई एक देवों का उपदेश। किया है–

इन्द्रवायू बृहस्पति मित्राग्नि पूषणं भर्गम्।
आदित्यान् मारुतं गणम्।।३।।

अर्थ–इस मन्त्र में पूर्व मन्त्र से 'कण्वाः', 'अहूषत' और श्गृणन्तिश इन तीन पदों की अनुवृत्ति आती है। जो मनुष्य ईश्वर के रचे हुए उक्त इन्द्र आदि पदार्थों और उनके गुणों को जानकर क्रियाओं में संयुक्त करते हैं, वे आप सुखी होकर सब प्राणियों को सुखयुक्त सदैव करते हैं।।3।।

उक्त पदार्थ इस प्रकार संयुक्त किये हुए किस-किस कार्य को सिद्ध करते हैं, इस विषय का उपदेश अगले मन्त्र में किया है–

# पुराणेषु सृष्टिविज्ञानम्

**–जनार्दन प्रसाद कैरवानः**

सारयुतं सृष्टिविज्ञानं कोऽपि ज्ञातुम् इच्छति चेत्पुराणस्याध्ययनं विना सृष्टिरहस्यं ज्ञातुं न शक्यते। पुराणस्य प्रथम सोपानं सृष्टिविज्ञानमेव वर्तते। पुराणवर्णितः सर्गविचारः क्रियते चेत्सर्वेषां विज्ञानानां मूलं सृष्टिविज्ञानमेवास्ति। वर्तमानशताब्दौ यद्यपि विज्ञानेन अत्यधिकं ख्याति प्राप्ता किन्तु इदानीं येषां । विज्ञानानां समाजे प्रचारः प्रचलति प्रायशः तत्सर्वं पुराणेषु वर्णितं विद्यत एव। पुराणेषु अनेकविधविज्ञानं वर्तते यथा सृष्टिविज्ञानं, राजनीतिविज्ञानं, खगोलविज्ञानं, भूगोलविज्ञानादि। एषां विज्ञानानां क्वचिद् विस्तारेण क्वचित् संक्षेपेण, क्वापि इङ्गितेन च निर्देशः प्राप्यते, पौराणिककाले वैदिकऋषीणाम् एतस्मिन् विषये समीचीनं ज्ञानम् आसीत्। संस्कृतवाङ्मयस्य अध्ययनं कुर्मश्चेत् क्वापि स्पष्टरूपेण क्वापि वादरूपेण विषयस्य चर्चा विद्यते। पुराणेषु सन्निहितविषयस्य व्याखानं कृत्वा भारतीयाः गौरवम् अनुभवन्ति। एतत्तु प्रसिद्धं यत् पुराणानि स्वतन्त्राणि न सन्ति किन्तु एकस्मिन् पुराणे अष्टादश प्रकराणि सन्तीति विदुषां मतं वर्तते यथा एकस्मिन् ग्रन्थे बहवः अध्यायाः बहूनि स्वतन्त्रप्रकरणानि च सन्ति किन्तु तेषां निश्चितक्रमो न वर्तते। पुराणेषु व्याख्याकारः सृष्टिविज्ञानं प्रथम, मध्ये, अन्ते वा कृतवान्। एतत्तु वक्तुरिच्छा, किन्तु पुराणेषु नियतक्रमेणेव व्याख्यानम् उपलभ्यते। सृष्टिविज्ञानमेव प्रथमः क्रमो वर्तते। पुराणशब्दस्य सृष्टिविज्ञानेन सह साक्षात् सम्बधो वर्तते। यथा अष्टादशपुराणानां क्रमः इत्थं वर्तते

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टकम्।
अनापलिङ्गकूस्कानि पुराणानि पृथकपृथक।[1]

अष्टादशपुराणेषु व्याख्यानमपि नियतक्रमेण एव वर्तते। स्थूलदृष्ट्या पुराणानां विचारं कुर्मः चेत् प्रतीयते यत् सृष्टिविज्ञानस्य ब्रह्मपुराणम् आरभ्य ब्रह्माण्डपुराणपर्यन्तं समाप्तिरेव, मध्ये तु ब्रह्मवैवर्तपुराणं वर्तते। एतत्तु पुराणस्य क्रमः। पुराणस्य क्रम एव सृष्टिविज्ञानम्। सूक्ष्मब्रह्माण्डे स्थूलब्रह्माण्डे वा यः क्रम प्रचलति सः क्रम एव सृष्टिविज्ञानमिति ज्ञातव्यम्। ।

सृष्टि-स्थिति-प्रलयानाम्, ईश्वरजीवप्रकृतीनां, ब्रह्मविष्णुमहेशानां मायापुरुषब्रह्मणां च मनोरमाभिः मधुरसान्द्राभिः आख्यायिकाभिः यादृशं वैज्ञानिक दार्शनिक च चित्रणं पुराणेषु विहितं तादृशं नान्यत्र दृष्टिपथमायाति।।

विषयाणां विविधता पौराणिकसाहित्यस्य विलक्षणता विद्यते। प्रतिपाद्यविषयम् अक्षिलक्ष्यीकृत्य विष्णुपुराणे पुराणानां पञ्चलक्षणानि निर्धारितानि–

**सर्गः प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥**

उक्तेषु पञ्चसु लक्षणेषु वृत्तिः, रक्षा, संस्था, हेतुः, आपाश्रयश्चेति एतेषां पञ्चानां सम्मिश्रणेन भागवतकृता दशभिर्लक्षणैर्युक्तं पुराणमिति विज्ञापितम्। उपर्युक्तलक्षणानुसारेण पुराणेषु निम्नविषयाणामपि समावेशः स्वीक्रियते

प्रतिपाद्यविषयमवलम्ब्य पुराणानां पञ्चविधानि लक्षणानीत्थं निर्दिष्टानि–

1. सृष्ट्युत्पत्तिवर्णनम्– सर्गः।
2. सृष्टिप्रलययोः पौनःपुन्येन प्रादुर्भावः– प्रतिसर्गः।
3. देवानां राज्ञश्च वंशावल्या विवरणम– वंशः।
4. प्रत्येकम् आदिपुरुषस्य मनोः कालस्य, तत्कालघटितानां च घटनानां यथाक्रमं वर्णनम्– मन्वन्तराणि।
5. सूर्यचन्द्रादिप्रसिद्धवंशोद्भवानां भूपानाम् ऐतिहासिकचित्रणम्– वंशानुचरितम्।

इत्थं पञ्चलक्षणलक्षितं पुराणं सृष्टिविज्ञानस्य, अध्यात्मज्ञानस्य, राजनीतेः, अर्थशास्त्रस्य, ऐतिह्यस्य, भूगोलविज्ञानस्य, अन्यस्य च सर्वस्यापि व्यावहारिकस्य जनोपयोगिनो विषयस्य विश्वकोशः खलु।

किन्तु सम्यक्तया विचार्यते चेत् सृष्टिविज्ञानमेव पुराणस्य मुख्यप्रतिपाद्यविषय एव प्रतीयते। शेषाः प्रतिपाद्याः चतुर्विषयाः उपोद्घात इति मन्यन्ते। सृष्टिविज्ञानं विना अन्यविषयाणां साङ्गोपाङ्गविचारणनिरुपणम् अशक्यम्।

क्षीरसमुद्रे शेषशय्यायां भगवान् नारायणः आसीत् शयानः। तदा जगज्जननी लक्ष्मीः चरणसेवायां रता आसीत्। तत्र भगवान् नारदः समीपे स्थित्वा नारायणस्य स्तुतिं चकार– 'एकोऽहं बहु स्याम' इति। एवंस्थितस्य तस्य मनसि यदा सृष्टिसर्जनविषयस्य चिन्तनमायातं तदा तस्य नाभिमण्डलात् पद्मम् उपद्यत तच्च पद्म पुराभूतं पृथिवीरूपमुत्तमम्।

यत्पद्मं सारदादेवी, पृथिवी परिलक्ष्यते॥ पद्मपुराणानुसारं कमलशब्देन पृथिवी निर्दिश्यते। भवगतो विष्णोर्नाभिमण्डलात् यत् कमलम् उत्पन्नं तत्कमलं पृथिवीति मन्तव्यम्।

तस्मिन् कमले चतुर्मुखस्य ब्रह्मणः उत्पत्तिर्जाता असौ ब्रह्मा स्थावरजङ्गमात्मकं सम्पूर्णं विश्वं रचयामास–

चतुर्मुखस्ततो जातो ब्रह्मा लोकपितामहः।
तदन्तरेऽभवत् क्रोधः कस्माच्चित् कारणात् तदा।।
आत्मनो मुनिशार्दूलास्तत्र देवो महेश्वरः।
रुद्रः क्रोधात्मजो जज्ञे शूलपाणिस्त्रिलोचनः।
तेजसा सूर्यसंकाशस्त्रैलोक्यं संहरन्निव॥[4]

ब्रह्मणः मनसि कस्माचित् कारणात् किञ्चित् क्रोधः समुत्पन्नः। क्रोधाद्धि तस्मात् त्रैलोक्यसंघारात्मकः सूर्यकोटिसमप्रभात्मकंश्च शूलपाणिः रुद्रः प्रकटितः यः खलु सम्पूर्णसंसारस्य प्रलयस्वरूपः संहारकश्च वर्तते।

इत्थम्भूतेन सृष्टिविज्ञानेन प्रतिपाद्यते यत् सृष्टिरहस्यं वर्तत अतिगूढम्। सूर्यचन्द्रतारापृथिव्यादयो गोलाकाराः पद्मस्वरूपाः च वर्तन्ते। विष्णुनाभिमण्डलात् यत् पद्मम् उद्भूतं तदेव चन्द्रः, सूर्यः, नक्षत्राणि पृथिव्यादिमण्डलस्वरूपम्। शास्त्रे वर्णितेषु द्वादशेषु आदित्येषु सूर्योऽन्तिम आदित्यनाम्नः प्रसिद्धः चैव विष्णुशब्देन कथ्यते।

एतस्मिन् विषये पूर्वाचार्याणां मतं किञ्चित् भिन्नं वर्तते। तेषु केचन त्रिविधात्मक केचन च प्रकृतिमूलतत्त्वं स्वीकुर्वते। तस्य सिद्धान्तः प्रकृतिवाद इति शब्देन प्रचक्ष्यते। कोऽपि आग्नेयप्राणस्वरूपं मूलतत्त्वं स्वीकरोति। कोऽपि विवर्तवादं स्वीकरोति। एतेषां मतानां मूलं ब्रह्मैव वर्तते। असौ ब्रह्म मनसा, वाचा कर्मणा वा ज्ञातुं न शक्यते।। चराचरलोके यां सृष्टिं वयं पश्यामः तत्तु सर्वं ब्रह्मणः सृष्टिविज्ञानमिति पुराणसिद्धान्तम् इत्यलम्।

पादटिप्पण्यः

1. देवीभागवतम्
2. विष्णुपुराणम्
3. पद्मपुराणम्, सृष्टिखण्डम्, अध्यायः 40 – 18
4. कूर्मपुराणम् अध्यायः 2 – 5,6




खादी वस्त्र ही नहीं, विचार है !

आदर्श ग्रामोद्योग समिति, दिल्ली

खादी वस्त्रों का विशाल भण्डार

✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल ( रेडीमेड ) ✪ रेशम साड़ी ( रिल्ड ) ✪ रेशम स्पन व रेडीमेड ✪ पोली खादी

सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।

खादी ग्रामोद्योग भवन

✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, ( उ० प्र० )
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोनः-0120-2631855, 9899334204

# मुक्तामाला

-डॉ० निरञ्जन मिश्रः
एसोसियेट प्रो०
श्रीभगवानदास-आदर्शसंस्कृतमहाविद्यालयः,हरिद्वारम्

कुलिष्ठेन तन्न विघातनं कुसुमेन यद्भवतीह रे
गरलेन तननहि यज्जनैर्मधुनाऽधुनात्र विधीयते।
नहि दुर्जनैर्निजताण्डवेन तथा करोत्यपघातनं
ननु मूकतामधिगत्य यत्क्रियते विचर्चितसज्जनैः।।1।।

विजयन्तु ते जनिभूमिरक्षणतत्परा रणधूर्धरा
रिपुवर्ममर्मविभेदिनो निजजन्मगौरवमानिनः।
शिवताण्डवैरसुरारिसेवकमर्दनेन सुरांगने
सुरचारणस्तुतिकीर्तनैर्विलसन्ति येऽमरकीर्तयः।।2।।

गुरुपादपद्मपरागपीततनोर्मुखे धवलाम्बरा
स्थिरतामुपेत्य करोति कीर्तिलताप्रसूनविकासनम्।
मधुगन्धलुब्धमधुव्रतप्रियगानगुञ्जितमम्बरं
यदि वाञ्छसीह सखे! स्वयं निहितार्थतत्त्वमुपाहर।।3।।

गगने यदा चरति स्म चन्द्रकलाधरा जलदावली
जनता तदा वदति स्म यन्निजनामसार्थकतां नय।
पततीह सा तिमिराम्बरा कुलिशात्ममानविमर्दिनी
वदतीह तां कुलघातिनीं जनतेह पश्य विडम्बनाम्।।4।।

सरसाऽथवा विरसा भवेन्मृदुलाथवा कुटिला भवे-
ल्ललिता भवेल्लुलिता भवेतज्जलदावली नवदामिनी।
वरटा भवेदथवा मृगी पिकभाषिणी गजगामिनी
हृदये वसेद् गृहिणी सदा गृहिणी यशोबलवर्धिनी।।5।।

तनयो यदा जनकात्ममर्दनकौष्ठालं समुपाहरेत्
तनया तथा कुलगौरवाचलखण्डने निरता भवेत्।
गृहिणी द्वयोर्मुखमण्डने पतिगौरवं ननु विस्मरे-
न्निजजीवनं कथमत्र कश्चित् सस्मितः पुनरावहेत्।।6।।

ऋषिभिस्समर्चितपद्धतौ रतिरस्ति यस्य विमानिनो
गिरिगह्वरोचितजीवनाद्विरतौ कथं किल तन्मतिः।
कनकार्जने रतिरस्ति यस्य न तद्रतिर्विपिनांगने
विदितं सदैव कथं वदन्ति जनाः कलौ ह्यसदर्थिनः।।7।।

यवनप्रताडितहिन्दवो विलपन्तु नाम धरातले
दलिप्रताडितसज्जना निपतन्तु नाम हविर्भुजि।
जनशोणितेन हि जीवितो हरिणादनस्य मुखाम्बुजे
पततां सदा मधुगुञ्जनेन हि गुञ्जितं मम भारतम्।।8।।

बहुनायका विलपन्ति नीतिविचक्षणैस्समुदीरितं
बहुनायकत्वमवाप्य जीवति लोकतन्त्रमिहाद्भुतम्।
अयि शास्त्ररक्षणधर्मपालक! किं करिष्यसि जीवने
निजपूर्वजार्जितरक्षणं किमु वा स्वजीवनरक्षणम्।।9।।

कविते तवाननदर्शनेन हि जीवनं मम जीवनं
जनताविलासनिदर्शनेन तु वज्रदग्धमिवांगनम्।
गृहदाहतत्परमानवैषरदभ्रगर्जनकम्पितं
वदनं वहाम्यथवा घनागमचिन्तनेन हि चर्वितम्।।10।।

नगरेऽथवा वसतौ परस्परमेव जीवनकर्तनं
धवलाम्बरैर्मलिनाननाननमर्दनं परिमर्दनम्।
पशुनिन्दितैरपि देववन्दितकीर्तिगौरवदारणं
प्रविलोक्य केन बलेन कस्य भवेदहो ह्यभिनन्दनम्।।11।।




## संस्मरामः

डॉ श्रेयांशद्विवेदी
कुलपतिः
महर्षि-वाल्मीकि-संस्कृत-विश्वविद्यालयः
कैथल, हरियाणा

दशम्यां मनोयोग पूर्णं हि कार्यम्,
सुसम्पन्नमेवं सुसम्पादितञ्च।
तदानीं यमप्रेरितं रेलयानम्
अचिन्त्यैव सर्वान् गतासूंश्चकार।।1

सदानन्दिता मेलकं ह्यागतास्ते,
स्वपत्न्या तथा बालकैः सार्द्धमेव।
स्वकार्याणि सम्पाद्य भावान्तराणि,
निधायागताँस्तान् सदा संस्मरामः।।2

सुकालेन सम्प्रेरिता भ्रातरस्ते,
गता रेलमार्गे अचिन्त्यैव सर्वे।
ध्वनिस्फोटकेषु प्रचण्डाधिकासीत्,
अतस्माच्छ्रुतो नैव गन्त्रीध्वनिस्तैः।।3

समागत्य गन्त्री तदामृत्सरे च,
स्वभावेन सर्वान्नयन्ती ह्यगच्छत्।
अहो दुर्विदग्धो जनानां विनाशः,
हृदिस्फोटकं भारते ह्यस्मदीये।।4

क्वचित्पादहीनं क्वचिद्धस्तहीनम्,
क्वचित्प्राणहीनं जनानां विचित्रा।
स्थितिः कष्टदात्री हृदिस्फोटिकेयम्,
इदानीन्तने सैंसरेस्मिन् हि काले।। 5

सदोद्योगमध्येस्ति यन्त्रं विचित्रम्,
तथा द्वारमध्ये सदा सैंसरो वै।
यदि स्यात् सदा कैमरा यानमध्ये,
न हानिर्जनानां भविष्ये कदाचित्।।6

सुसंस्थानमेतत् समे काव्यविज्ञाः,
वयं भारतीयाः हताँश्चैव सर्वान्।
कविं वालमीकिं नमस्कृत्य सर्वे,
सुश्रद्धाञ्जलिं ह्यर्पयामःसमन्तात्।।7

लक्ष्मणपुरस्थेन उत्तर प्रदेश संस्कृत संस्थानेन महर्षि वाल्मीकि जयन्ती समारोहावसरे आश्विन शुक्ल पूर्णिमा संवत् 2075 (24/10/2018) बुधवासरे समायोजिते राष्ट्रियसंस्कृतकवि सम्मेलने समसामयिकी कविता प्रस्तुता

## रामो रुषा रौत्यहो!!!

-डॉ. अरविन्दतिवारी

लब्धं मे विपिनं विमातृवचनैः पित्रा प्रदत्तैःपुरा
सीता राजसुपुत्रिकापि गृहिणी साकं प्रयाता मया।
भ्रात्रा हा हसता सुबन्धुमणिना नूनं वनं काङ्क्षितं
जित्वा रावणराज्यमत्र तु कलौ वर्ते वितानेऽधुना।।1

भूयात्ते सदने सुखं सुविपुलं शान्तिश्चिरं वर्ततां
दृश्यं ते भवनं महोच्चमतुलं राराज्यतां भूतले।
किं रामस्य सखे वितानसदने स्वं जीवनं जीवतो
नूनं धर्मरतेर्वृथा प्रजपनं संशोभते भारते।।2

बाल्यं केवलमेव राजभवने संयापितं तत्परं
दुष्टानां दलने स्वयौवनमहो सर्वं गतं मे वने।
वार्धक्यं भवने कलत्ररहिते नीतं सुदुःखास्पदं
तस्माद्धन्त हृतं तु रामभवनं वर्ते विताने कलौ।।3

सोढं रावणमुक्तबाणशतकं शक्रारिसम्मूर्च्छनं
हा युद्धे दनुकुम्भकर्णकृतकं यद्भीषणं कीर्तितम्।
नो दुःखं परमं ततोऽपि मनुजाश्चक्षेऽद्य सत्यं ध्रुवं
यद्दुःखन्तु लभे वितानसदने वक्तुं न तत्पारये।।4

यद्येवं मुनितां व्रजन्ति निखिला भक्ता द्विजिह्वाः प्रिया
नो पीडा रघुवंशभूपहृदये शृण्वन्त्वये सादरम्।
हित्वा शक्रपुरीं प्रयामि नृपुरीं रे रे कृतघ्ना जनाः
व्यर्थं रामसमर्चनं कलियुगे रामो रुषा रौत्यहो!5

## महाकविरादिवाल्मीकिः

-राजेन्द्रत्रिपाठी 'रसराज'

महाकविमादिवाल्मीकिं संस्कृते सादरं वन्दे।
कृतिं रामायणं लोके तस्य कीर्तिं मुदा वन्दे।1।

महर्षिः स्नानबेलायां क्रन्दनं क्रौञ्चकारुण्यम्।
स्वयं श्रुत्वाकुलो जातः तस्य रामार्चनं वन्दे।2।

कथां रामायणीं कृत्वा लोकसंवेदनां भृत्वा।
जनानां जीवने दत्तं ज्ञानकोषालयं वन्दे।3।

गृहे लोके सुखे दुःखे जीवने किं न किं जातम् ।
सधैर्यं रामजानक्योः दारुणं पौरुषं वन्दे।4।

समाजे लोभनिन्दायाः कुत्सनैः रावणादीनाम्।
प्रजानां पालनार्थं वै स्वस्य दुःखार्जनं वन्दे।5।

गुरुर्माता-पिता-भ्राता-सेवकः साधकाः भक्ताः।
सुताःतुष्यन्ति एकैकं राजसिंहासनं वन्दे।6।

कदा किं कस्य कर्तव्यं केन कुत्रास्ति मर्यादा ।
सदैवादर्शभूतानां रामरामायणं वन्दे।7।

## सहसेऽधुना

डा. संजयकुमारचौबे

जनते शुचौ निजमानसे वसुधाधृतिं धरसेऽधुना
खलनायकास्यविनिर्गतं कटुकं वचः सहसेऽधुना।

कलहंसकोऽयमिति प्रकल्प्य मुदा हि यं मनसाऽचिनोः
बकतुल्यकर्म विलोक्य तस्य नतानने व्यथसेऽधुना।

मथनेन या मधुरा सुधा श्रमसागरादिह निर्गता
छलिने प्रदाय मुधैव तां निजसम्मदं लषसेऽधुना।

नगरं सुपुष्पविनिर्मितं कपिहस्तयोः परिरक्षितुं
मनसा समर्प्य मनोहरं हि तदीक्षितुं यतसेऽधुना।

श्रमवर्जिता अलसा भृशं घृतभक्षणे निरताः खराः
लवणाम्बुधौ बत मज्जिते मलिनं मनः कुरुषेऽधुना।

अनयेन बालिशपुत्रकैस्तव कल्पवृक्षफलं हृतं
विषगर्भितं निकृतं फलं नयनाश्रुभिः पणसेऽधुना।

जनतन्त्रपावनमन्दिरे त्वमयेऽसि विश्रुतदेवता
विवशे परं जननायकाङ्घ्रिरजोऽवरं भजसेऽधुना।

मनुजत्वमत्र विमर्दितुं खलानायकास्तु समुद्यताः
दलनाय हन्त कथं न तत्फणमञ्जसा यतसेऽधुना

ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज़, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति **सत्यार्थ प्रकाश** के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# 'मनोगतम्' – 49

## प्रसारण-तिथिः – 28-10-2018



–संस्कृत-भाषान्तरं
द्वारा- डॉ.बलदेवानन्द सागरः
Cell- 9810 5622 77
Email - baldevanand.sagar@gmail.com

मम प्रियाः देशवासिनः, भवद्भ्यः सर्वेभ्यः नमस्कारः। ओक्टोबर-मासे एकत्रिंशत्तमे दिने अस्माकं सर्वेषां प्रियस्य सरदार-वल्लभभाई-पटेलस्य जयन्ती वर्तते, तथा च, प्रतिवर्षमिव 'Run for Unity'-इति एकतायै धावनार्थं देशस्य युवजनाः सन्नद्धाः सन्ति। साम्प्रतन्तु ऋतुरपि बहु सुखदः। अयञ्च एकता-धावनस्य कृते उत्साह-वर्धकः। ममाग्रहोह्ययं यद् भवन्तः सर्वे बृहन्मात्रया एकताधावनेह्यस्मिन् नूनं सहभागित्वमावहन्तु। स्वाधीनता-प्राप्तेः प्रायेण सार्ध-षण्मासेभ्यः प्राक्, सप्तचत्वारिंशदुत्तरोनविंश-शततमे वर्षे जान्युआरि-मासे सप्त-विंशे दिने, विश्वस्य प्रसिद्धायाः Time Magazine' -इत्यान्ताराष्ट्रिय-पत्रिकायाः प्रकाशित-संस्करणस्य प्रथम-पृष्ठे सरदार-पटेलस्य छायाचित्रं प्रकाशितमासीत्। स्वीये मुख्ये वृत्त-विवरणे पत्रिकया भारतस्य एकं मानचित्रं प्रकाशितम्, अपि चैतत् मानचित्रं तादृशं नासीत् यादृशं वयमद्यत्वे पश्यामः। एतत् तादृशस्य भारतस्य मानचित्रमासीत् यद्धि अनेकधा विभक्तमवर्तत। तदा देशे सार्ध-पञ्चशताधिकानि रियासत-इति वंशभोग्यानि देशज-राज्यानि आसन्। आङ्ग्ल-जनानां भारत-विषयिणी रुचिः समाप्ता आसीत् परञ्च ते देशमिमं छिन्न-भिन्नं कृत्वा त्यक्तुमिच्छन्ति स्म। 'Time-पत्रिकया' लिखितमासीत् यत् भारते विभाजनं, हिंसा,खाद्यान्नसङ्कटं, महार्घता, सत्ता-इति शासनाधिकाराणां राजनीति-सदृशानि सङ्कटानिपरिभ्रमन्ति स्म। ततः परं 'Time-पत्रिका' लिखति यत् एतेषु सङ्कटेषु सत्सु देशं एकता-सूत्रेण सन्नद्धं, व्रणान् च सम्भर्तुं यदि कश्चन क्षमते चेत् सोह्यस्ति- सरदार-वल्लभभाई-पटेलः। 'Time-पत्रिका'याः विवरणमिदंलौहपुरुषस्य जीवनस्य अपरान् अपि पक्षान् प्रकाशयति। केन प्रकारेण सः विंशत्युत्तरोन- विंश-शततमस्य दशके अमदाबादे समापन्न-जलपूरावसरे साहाय्य-कार्याणां प्रबन्धनमकरोत्। केन प्रकारेण सः बारडोली-सत्याग्रहस्य दिङ्निर्देशनं व्यदधात्। देशस्य कृते तस्य प्रामाणिकता प्रतिबद्धता च तादृशे आस्तां यत् कृषक-श्रमिकोद्योगपति-प्रभृतयः सर्वेह्यपि तस्मिन् विश्वसन्ति स्म। गान्धि-चरणः सरदार-पटेलम् अकथयत् यत् राज्यानां समस्याः तावत्यो विकटाः सन्ति यत् केवलं भवान् एव एताः समाधातुमर्हति, तथा च, सरदार-पटेलः समस्यानां प्रत्येकं समाधाय देशम् एकतासूत्रेण सन्नद्धुम् असम्भवकार्यं पूर्णतामनयत्। सः सर्वेषामपि वंश-भोग्यानां लघु-राज्यानां भारते विलयम्- कारयत्। भवतु तत् जूनागढ़म् आहोस्वित् हैदराबादम्,त्रावणकोरम् वा राजस्थानस्य वंश-भोग्यं राज्यम् - सः सरदार-पटेलः एवासीत् यस्य विवेकेन रणनीतिक-कौशलेन चाद्य वयं एकं हिन्दुस्थानम् अवलोकयितुं पारयामः। एकता-सूत्रेण समन्वितं राष्ट्रमेतं, अस्मदीयां भारत-मातरं दृष्ट्वा वयं स्वाभाविक-रूपेण सरदार-वल्लभभाई-पटेलस्य पुण्य-स्मरणं कुर्मः। ऐषमः ओक्टोबर-मासीये एक-त्रिंशत्तमे दिने सरदार-पटेलस्य जयन्ती तु इतोऽपि विशिष्टा भविता -दिनेह्यस्मिन् सरदार-पटेल-वर्याय तात्विक-श्रद्धाञ्जलिमर्पयन्तो वयं Statue of Unity-इति एकता-प्रतिमां राष्ट्राय समर्पयिष्यामः। गुजराते नर्मदा-नदी-तटे स्थापितायाः अस्या प्रतिमायाः उत्तुङ्गत्वम् अमेरिका-देशस्य 'Statue of Liberty'-इत्यपेक्षया द्विगुणितं वर्तते। इयं हि विश्वस्य उच्छ्रिततमाप्रतिमा -प्रत्येकमपि भारतीयः एवं परिभाव्य गौरवमनुभविष्यति यत् विश्वस्यउच्छ्रिततमाप्रतिमा भारत-भूमौ विराजते। असौ सरदार-पटेलः यो हि धरण्या धृत-सम्पर्कः आसीत्, इतः परं नभसोह्यपि शोभां विवर्धयिष्यति। आशासे यत् देशस्य प्रत्येकमपि नागरिकः'मातुः भारत्याः' अस्याः महत्याः उपलब्धेः विषये विश्वस्मिन्नपि विश्वे सगौरवं वक्षसो वितान-पुरस्सरं, शिरः उन्नमय्य चास्याः गौरवं गास्यति तथा चेदं स्वाभाविकं यत् प्रत्येकमपि हिन्दुस्थानीअस्याः एकता-प्रतिमायाः दर्शनाभिलाषुकः भवेत्, तथा च विश्वसिमि यत् हिन्दुस्थानस्य प्रत्येकमपि कोणियाः जनाः, इतः परं स्वीयं बहुतरं प्रियमिदं पर्यटन-स्थलमिति रुचिमाधास्यन्ति।

मम प्रियाः भ्रातरः भगिन्यश्च, ह्यः एव वयं देशवासिनः 'पदाति-सेना-दिवसम्' आयोजितवन्तः। भारतीय-सेनायाः अङ्गत्वेन ये वर्तन्ते तेभ्यः सर्वेभ्यः नमस्करोमि। निज-सैनिकानां साहसिक-कुटुम्बानि अपि अभिवन्दे, परञ्च किं भवन्तः जानन्ति यत् वयं हिन्दुस्थानीयाः सर्वे इमं 'पदाति-सेना-दिवसम्' किमर्थम् आयोजयामः ? एतद्विषये न मनागपि वयं सूचिताः- न ज्ञायते यत् कथं शनैः शनैः दिवसोह्ययन्तु स्मृतिस्थः जातः परञ्च अस्य कारणं किमासीत् इति स्यात् सामान्यः हिन्दुस्थानीयः नैव जानाति। अयमेव स दिवसः, यदा भारतीय-सैनिकाः कश्मीर-धरायामवतीर्णाः आसन्, तथा च अवैध-प्रवेशकेभ्यः उपत्यकामरक्षन्। ऐतिहासिकीघटनैषा अपि सरदार-वल्लभभाई-पटेलेन साक्षात् सम्बद्धास्ति। भारतस्य महतः सैन्याधिकारिणः साम्-माणेकशाहस्य प्राचीनमेकं साक्षात्कारं पठन्नासम्। तस्मिन् साक्षात्कारे Field Marshal Manekshah [माणेकशाह], स्वीय-कर्नल-पद-कालं संस्मरन् आसीत्। अस्मिन्नवसरे सप्त-चत्वारिंशदुत्तरोनविंश-शततमे वर्षे ओक्टोबर-मासे, कश्मीर-क्षेत्रे सैन्याभियानमारभत। Field Marshal Manekshah असूचयत् यत् एकस्य उपवेशनस्य अवसरे कश्मीरस्य कृते सेना-प्रेषणे सञ्जायमानं विलम्बमभिलक्ष्य सरदार-वल्लभभाई-पटेलः रुष्टः संवृत्तः। सरदार-पटेलः उपवेशनावसरे निज-विशिष्ट-शैल्या तमवलोक्य अकथयत् यत् कश्मीरे सैन्याभियाने न मनागपि विलम्बो भवेत्, अपि च तूर्णमेव अस्याः समस्यायाः समाधानं स्यात्। ततः परमेव सैनिकाः विमानैः कश्मीरं प्रति प्रस्थिताः, तथा च, वयं ज्ञातवन्तः यत् केन प्रकारेण सेनासफलतामवाप्नोत्तु अमुमेव वयं 'Infantry Day'-इति पदाति-सेना-दिवस-रूपेण प्रतिवर्षम् आयोजयामः। सरदार-महोदयाय श्रद्धाञ्जलिः, सरदार-वर्याय सादरं प्रणतिः। देशस्य दृढतायाः एकतायाश्च कृते तस्य सन्देशाय अपि प्रणामः। देशस्य एकतायै तस्य समर्पणस्य कृते प्रणतिपातः। ओक्टोबर-मासीये एकत्रिंशत्तमे दिने अस्माकं प्राक्तन-प्रधान-मन्त्रिणः इन्दिरागान्धि-महाभागायाः अपि पुण्यतिथिरस्ति। इन्दिरा-महाभागायै अपि सादरं श्रद्धाञ्जलिः।

मम प्रियाः देशवासिनः, क्रीडा कस्मै न रोचते ? क्रीडाजगति चैतन्यं, शक्तिः, दक्षता, क्षमता- एतानि सर्वाणि अतितरां महत्वपूर्णानि सन्ति। एते भवन्ति कस्यचन क्रीडकस्य सफलतायाः निकषः, अपि च, एतान्येव चत्वारि गुणानि कस्यचन राष्ट्रस्य निर्माणार्थमपि महत्वपूर्णानि भवन्ति। कस्यचन देशस्य युव-जनेषु यदि एतानि चत्वारि सन्ति चेत् स देशः न केवलं प्रविधि-विज्ञानार्थव्यवस्था-सदृशेषु क्षेत्रेषु प्रोन्नतो भविता, परञ्च क्रीडास्वपि स्वीयं ध्वजमुत्तोलयिष्यति। नातिचिरं मम स्मरणीयं मेलन-द्वयम् अजायत। अनयोः प्रथमं,जकार्ता-नगरे सम्पन्नानां ऐषमः 'Asian Para Games'-इति एशिया-दिव्याङ्ग-क्रीडा-स्पर्धानामस्मदीयैः दिव्याङ्ग-क्रीडकैः सह मेलनावसरः। एतासु क्रीडासु भारतेन आहत्य द्विसप्ततिः पदकानि विजित्य नूतनं कीर्तिमानं विरचितं तथा च, भारतस्य गौरवं विवर्धितम्। एतैः सर्वैः प्रतिभावद्भिःदिव्याङ्ग-क्रीडकैः साकं व्यक्तिशः मेलनस्य सौभाग्यं अहमवाप्नवम्, तथा चाहं तान् वर्धापितवान् । तेषां दृढा इच्छाशक्तिःप्रत्येकमपि विपरीत-परिस्थितिषु सङ्घर्षं कृत्वा अग्रेसरणस्य कृते तेषां समुत्साहश्च, अस्मान् सर्वान् अपि देशवासिनः सततं प्रेरयतः। एवं रीत्या Argentina-देशे ऐषमः 'Summer Youth Olympics'- इति ग्रीष्मकालीन-युव-ओलम्पिक्-क्रीडा-स्पर्धानां विजेतृभिः साकं मेलनावसरो लब्धः। एतद् ज्ञात्वा भवन्तः प्रसन्नतामनुभविष्यन्ति यत् आसु क्रीडा-स्पर्धासु अस्माकं युवभिः एतावत्-पर्यन्तं उत्कृष्टं प्रदर्शनं विहितम्। अस्मिन् आयोजने वयं त्रयोदश पदकानि अतिरिच्य मिश्रितासु स्पर्धासु अपराणि त्रीणि पदकानि अवाप्नुम। कदाचित् भवतां स्मरणे स्यात् यत् साम्प्रतिके क्रमे एशिया-क्रीडा-स्पर्धासु अपि भारतस्य प्रदर्शनम् सर्वोत्तममवर्तत। पश्यन्तु ! विगतेषु सद्यः कतिपय-पलेषु अहं कतिवारं 'एतावत्-पर्यन्तंउत्कृष्टप्रदर्शनं', 'भारतस्यप्रदर्शनम्सर्वोत्तमम्', चेति शब्दान् प्रायुजम। एषास्ति अद्यतनानां भारतीय-क्रीडानां कथा या ह्यनुदिनं नूतनोपलब्धीः अवाप्नोति। भारतं न केवलं क्रीडासु अपि तु तेषु क्षेत्रेष्वपि नूतनानि कीर्तिमानानि विरचयति येषां विषये न कदाचिदपि विचारितमासीत्। उदाहरणार्थमहं भवतः Para Athlete-नारायण-ठाकुरस्य विषये विज्ञापयितुमिच्छामि, यो हि ऐषमः एशिया-दिव्याङ्ग-क्रीडा-स्पर्धासु देशस्य कृते धावन-स्पर्धायां सुवर्ण-पदकं विजितवान्। असौ जन्मना एव दिव्याङ्गः अस्ति। यदायं अष्ट-वर्षीयः सञ्जातः तदा तस्य पितृ-चरणः प्राणान् अत्यजत्। पुनश्चासौ आगामीनि अष्ट-वर्षाणि एकस्मिन् अनाथालये यापितवान्। अनाथालयं परित्यज्य आजीविकायैनारायण-ठाकुरः दिल्ली-परिवहन-निगमस्य बस-यानानां स्वच्छीकरणमकरोत्, दिल्ल्यां च मार्गोपान्ते स्थितेषु अनावृत-भोजनालयेषु परिचारकत्वेन कार्यमकरोत्। अधुना स एव नारायणः अन्ताराष्ट्रिय-क्रीडा-स्पर्धासु भारताय सुवर्ण-पदकं जयति। एतावदेव नैव, भारतस्य समेधमानं क्रीडा-पाटव-परिधिम् अवलोकयन्तु,भारतं जूडो-स्पर्धायाः वरिष्ठे वा कनिष्ठे, कस्मिन्नपि स्तरे न कदापि, ओलिम्पिक्-पदकं विजितवत्। परञ्च तबाबी-देवी युव-ओलिम्पिक्-स्पर्धासु जूडो-द्वन्द्वे रजत-पदकं विजित्य इतिहासं विरचितवती। षोडश-वर्षीया क्रीडिका तबाबी-देवी मणिपुरस्य अन्यतम-ग्राम-वासिनी वर्तते। तस्याः जनकः श्रमिकः, जननी च मत्स्य-विक्रयं करोति। नैकवारं तस्याः कुटुम्बं तादृशं कालं सम्मुखीकृतवत् यदा तेषां पार्श्वे अशनार्थमपि नाणकानि न भवन्ति स्म। एताः परिस्थितयोह्यपि तबाबी-देव्याः धैर्यं अवधीरयितुं नैवापारयन्। तथा च सा देशस्य कृते पदकंविजित्यइतिहासंविरचितवती। एतादृश्यः असंख्याःकथाः सन्ति। प्रत्येकमपि जीवनं प्रेरणा-स्रोतस्त्वेन वर्तते । प्रत्येकं युवा क्रीडकः तस्य चोत्साहः नूतन-भारतस्य अभिज्ञानं वर्तते।

मम प्रियाः देशवासिनः, कदाचिद् भवतां स्मरणे स्यात् यद् वयं विगते वर्षे FIFA-सप्तदशोन-विश्व-चषक-स्पर्धानां सफलायोजनं कृतवन्तः। निखिलमपि विश्वम् अतितरां सफल-क्रीडा-स्पर्धात्वेन एतत् प्राशंसद् अपि च,FIFA-सप्तदशोन-विश्व-चषक-स्पर्धासु दर्शकाणां संख्याविषयोह्यपि नवीनं कीर्तिमानं व्यरचयत् । देशस्य पृथक्-पृथक् क्रीडाङ्गणेषुद्वादश-लक्षाधिकाः जनाः पाद-कन्दुक-क्रीडानाम् आनन्दम् अन्वभवन्, तथा च, युव-क्रीडकानाम् उत्साहं विवर्धितवन्तः। वर्षेह्यस्मिन् भारतं भुवनेश्वरे ऐषमः पुरुष-हॉकी-विश्व-चषक-स्पर्धानां आयोजन-सौभाग्यमलभत। हॉकी-विश्व-चषक-स्पर्धाः नवम्बर-मासस्य अष्टाविंशत्तःआरभ्य डिसेम्बर-मासस्य षोडश-दिनं यावत् प्रचलितारः। प्रत्येकमपि भारतीयः, यो हि कामपि क्रीडां खेलति वा कस्याञ्चन अपि क्रीडायां तस्य तस्याः वा रुचिः भवेत्,तेषां तासाञ्च मनस्सु हॉकीं प्रति, अनुरक्तिः नूनं भवत्येव। भारतं हॉकी-क्रीडायां स्वीयं स्वर्णिमेतिहासं विरचयति । व्यतीते काले भारतं विविधासु प्रतियोगितासु सुवर्ण-पदकानि विजितवत् तथा चैकवारं विश्व-चषक-विजेतृरूपेणापि अवर्तत। भारतं अनेकान् महतः हॉकी-क्रीडकान् अपि अजनयत्। जगति यदापि हॉकी-विषयिणी चर्चा भविष्यति, तदा भारतस्य एतैः महद्भिः क्रीडकैः विना हॉकी-कथा अपूर्णा एव स्थास्यति। हॉकी-प्रवीणः मेजर-ध्यानचन्दः अशेष-जगति सुख्यातोह्यस्ति। ततः परं बलविन्दर-सिंहः वरिष्ठः, लेस्ली-क्लौड़ीयस् (Leslie Claudius), मोहम्मद्-शाहिदः, ऊधम-सिंहतः धनराज-पिल्लईम्-यावत् हॉकी-क्रीडा महतीमेकां यात्रां पूर्णतामनयत्। अद्यापि भारत-वृन्दस्य क्रीडकाः निज-परिश्रमेण अनुरक्त्या च अधिगम्यमानाभिः सफलताभिः हॉकी-क्रीडायाः नूतन-सन्ततिं सततं प्रेरयति। खेला-प्रेमिणां कृते लोमहर्षक-स्पर्धानामवलोकनं हि समीचीनावसरत्वेन भवति। भुवनेश्वरं यान्तु तथा च, न केवलं भारतीय-समूहम् उत्साहयन्तु परञ्च सर्वाण्यपि वृन्दानि प्रोत्साहयन्तु। ओड़िशा नाम तादृशमेकं राज्यं यस्य नैजः गौरवपूर्णः इतिहासः वर्तते,समृद्धञ्च सांस्कृतिकं रिक्थमस्ति, अपि च, अत्रत्याः जनाः अपि भावोत्साह-भरिताः भवन्ति। क्रीडा-प्रेमिणां कृतेह्ययं ओड़िसा-दर्शनस्यापि बृहदवसरोह्यस्ति। अत्रान्तरे क्रीडानन्दानुभवेन सहैव भवन्तः कोणार्कस्य सूर्यमन्दिरं, पुर्यां भगवतो जगन्नाथस्य मन्दिरं, चिल्का-तडाग-सहितानि अनेकानि विश्वप्रसिद्धानि दर्शनीयानि पवित्रस्थलानि चापि नूनम् अवलोकयितुं शक्नुवन्ति। अहं अस्याः प्रतियोगितायाः कृते भारतीय-पुरुष-हॉकी-वृन्दं शुभकामना-प्रदानेन वर्धापयामि तथा च, तान् सर्वान् अपि विश्वासयामि यत् सपाद-शत-कोटि-भारतीयाः तैः सम्भूय तेषाञ्च समर्थने सुस्थिताः सन्ति, एवञ्च भारतमागम्यमानेभ्यः विश्वस्य सर्वेभ्योह्यपि क्रीडक-गणेभ्यः भूयान्सि शुभकामना-वचान्सि व्याहरामि।

मम प्रियाः देशवासिनः, सामाजिक-कार्यार्थं येन विधिना जनाः अग्रे आयान्ति,तदर्थञ्च स्वैच्छिकतया कार्याणि आचरन्ति, तद्धि सर्वेषामपि देशवासिनां कृते प्रेरणादायकम् उत्साह-प्रदञ्चास्ति। वस्तुतस्तु,'सेवा परमो धर्मः' इत्यस्ति भारतस्य रिक्थम्। युग-युग-प्राचीनाः सन्ति अस्मदीयाः परम्पराः, तथा च, समाजस्य प्रत्येकमपि कोणे, प्रत्येकमपि क्षेत्रे च वयमासां परम्पराणां सुरभिम् अद्यापि अनुभवामः। परञ्च नवीने युगे, नूतन-पद्धत्या, नव-सन्ततिः,नूतनानन्देन, अभिनवोत्साहेन, नव-नवानि स्वप्नानि आदाय एतानि कार्याणि अनुष्ठातुमद्यत्वे अग्रे आयान्ति। विगतेषु दिनेषु कार्यक्रममेकं गतवान् यत्र एकं प्रवेश-द्वारं प्रवर्तितं, यस्य नामास्ति - 'Self y Society'- समुदायाय आत्मा। MyGov, देशस्य सूचना-प्रविधिः, वैद्युदाणविकोद्योगश्च स्वीय-कार्मिकान् सामाजिक-कार्यार्थं प्रोत्साहयितुम्, एतदर्थञ्च अवसरान् उपलम्भयितुं प्रवेश-द्वारमिदं

प्रवर्तितवन्तः। अस्यकार्यस्यकृते तेषु यावान् समुत्साहः, प्रसक्तिश्च वर्तते तद्दृष्ट्वा प्रत्येकमपि भारतीयः गौरवमावक्ष्यति। सूचना-प्रविधितः समुदायं यावत्, अहं नैव वयम्,स्व-तः समष्टियात्रायाः सुरभिः अत्रास्ति। कश्चन बालं पाठयति, अपरत्र कश्चन वरिष्ठान् पाठयति, कश्चन स्वच्छता-कर्मणि संनिरतः, तर्हि कश्चन कृषकेभ्यः साहाय्यं करोति, तथा चैवंकरणस्य कृते न काचिदपि अपरा लालसास्ति अपि तु, अत्र समर्पण-सङ्कल्पयोः निःस्वार्थ-भावः सन्निहितोह्यस्ति। अन्यतमो युवा दिव्याङ्गानां wheelchair basketball-इति चक्रासन्दिका-कण्डोल-कन्दुक-गणस्य साहाय्यमनुष्ठातुकामः स्वयमपिचक्रासन्दिका-कण्डोल-कन्दुक-क्रीडां शिक्षितवान् । अयं हि उत्साह-भावः, एतच्च समर्पणम् - नूनमिदं लक्ष्योन्मुखि कार्यमस्ति। किं कस्यचनापि हिन्दुस्थानीयस्य कृते नायं गौरव-विषयो भविता ! अवश्यं भविता ! अहंनैववयम्-इति भावना अस्मान् सर्वान् प्रेरयिष्यति।

मम प्रियाः भ्रातरो भगिन्यश्च, एतस्मिन् क्रमे यदाहं 'मन की बात'-प्रसारण-विषयकान् भवतां परामर्शान् अवलोकयन् आसम्, तदा पुडुचेर्याः श्रीमनीष-महापात्रस्य अतितरां रुचिरा टिप्पणी मया दृष्टा। सः Mygov-इत्यत्र अलिखत् - 'कृपया भवान् 'मन की बात'-इति कार्यक्रमे अस्मिन् क्रमे भाषतां यद्भारतस्य जनजातयः तासां रीतयः परम्पराश्च केन प्रकारेण प्रकृत्या साकं सहास्तित्वस्य सर्वश्रेष्ठमुदाहरणमस्ति इति। Sustainable development-इति संधारणीय-विकासार्थं केन प्रकारेण अस्माकं कृते तासां परम्पराणाम् अङ्गीकरणस्य आवश्यकताः वर्तन्ते, ताभ्यः किञ्चित् किञ्चित् शिक्षणम् आवश्यकमिति।

मनीष-महोदय ! विषयमेनं 'मन की बात'-कार्यक्रमस्य श्रोतर्णिां मध्ये उपस्थापनार्थमहं भवन्तं प्रशंसामि। तादृशोह्ययं विषयोह्यस्ति यो हि अस्मान् स्वीयं गौरवपूर्णमतीतं संस्कृतिञ्च प्रति अवलोकयितुं प्रेरयति। अद्यत्वे कृत्स्नमपि विश्वं विशेषरूपेण च पश्चिम-देशाः पर्यावरण-संरक्षणं चर्चन्ते, तथा च, संतोलित-जीवनशैल्याः कृते नूतनान् मार्गान् मृगयन्ति। यद्यपि साम्प्रतम् अस्मदीयं भारतवर्षमपि अस्याः समस्यायाः अस्पृष्टं नैवास्ति, परञ्च अस्याः समाधानार्थम् अस्माभिः केवलं स्वीयाभ्यन्तरं विवेचनीयम्, नैजं समृद्धमितिहासम्, परम्पराश्च विचारणीयाः सन्ति, तथा च, विशेषेण अस्मदीयानां जनजातीय-समुदायानां जीवनशैली अवगन्तव्यास्ति। प्रकृत्या साकं सामञ्जस्यं स्थापयित्वा जीवितव्यमिति अस्माकम् आदिवासि-समुदायानां संस्कृतौ समाविष्टम् । अस्मदीयाः आदिवासिनो भ्रातरो भगिन्यश्च वृक्षान् पादपान् पुष्पाणि च देवी-देवतावदेव पूजयन्ति। मध्य-भारतस्य भील-जनजातिः, विशेषरूपेण च मध्यप्रदेश-छत्तीसगढ़योः जनाः पिप्पलार्जुन-सदृशान् वृक्षान् सश्रद्धं पूजयन्ति। राजस्थान-सदृशायां मरुभूमौ बिश्नोई-समाजः अस्मान् पर्यावरण-संरक्षणस्य पन्थानं प्रादर्शयत् । विशेषेण वृक्षाणां संरक्षण-सन्दर्भे ते निज-जीवन-त्यागमेव बहु मन्यन्ते परञ्च एकोऽपि वृक्षः कदाचित् प्रणश्येदिति ते नैव स्वीकुर्वन्ति । अरुणाचलस्य मिशमी-जनाः,व्याघ्रैः साकं स्वीय-सम्बन्धान् साधिकारं ख्यापयन्ति। तान् ते निज-भगिनी-भ्रातृवद् आमनन्ति। नागालैण्डेह्यपिव्याघ्राः वनानां रक्षकरूपेण अवालोक्यन्ते। महाराष्ट्रस्य वार्ली-समुदाय-जनाः व्याघ्रान् अतिथित्वेन आमनन्ति। व्याघ्राणामुपस्थितिः तेषां कृते समृद्धि-प्रदायिनी गण्यते। मध्यभारतस्य कोलसमुदायस्य इयम् अन्यतमा मान्यता यत् तेषाम् आत्मनः सौभाग्यं व्याघ्रैः सम्बद्धमिति, यदि व्याघ्राः कवलं नैवाप्नुवन् चेत् ग्रामवासिनोह्यपि क्षुधिताः स्थास्यन्ति - इत्येतादृशी तेषां श्रद्धा। मध्य-भारतस्य गोंड-जनजातीयाः अभिजनन-ऋतौ केथन-नद्याः केषुचिद् भागेषु मत्स्याहरणं परित्यजन्ति । एतानि क्षेत्राणि मत्स्यानाम् आश्रय-स्थानमिति ते मन्यन्ते । अस्याः प्रथायाः कारणात् ते स्वस्थान् बहुसंख्यकान् च मत्स्यान् अवाप्नुवन्ति। आदिवासि-समुदायाः प्राकृतिक-सामग्रीभिः निज-गृहाणि निर्मान्ति। तानि च सुदृढानि सन्ति युगपदेव पर्यावरणानुकूलानि अपि भवन्ति। दक्षिण-भारतस्य नीलगिरि-प्रस्थानाम् एकान्त-क्षेत्रेषु एकः लघुः तोड़ा-इति यायावर-समुदायोह्यस्ति, पारम्परिकरीत्या तेषां वसतयः स्थानीय-स्तरेण उपलब्ध-वस्तुभिरेव विनिर्मिताः भवन्ति।

मम प्रियाः भ्रातरः भगिन्यश्च, इदं सत्यं यत् आदिवासि-समुदायः सुतरां शान्तिपूर्णः भवति, तथा च, पारस्परिक-सामञ्जस्य-पुरस्सरं स्थातुं विश्वसिति, परन्तु यदि कश्चन तेषां प्राकृतिक-संसाधनानि प्रणाशयति चेत् तदा ते निजाधिकाराणां कृते युद्धादपि नैव बिभ्यति। नेदम् आश्चर्य- करं यदस्माकम् आद्येषु स्वतन्त्र-सैनिकेषु आदिवासि-समुदा- यस्य एव जनाः आसन् । को नाम विस्मर्तुमर्हति - भगवन्तं बिरसामुण्डा-महोदयं यो हि निज-वन्य-भूमेः रक्षार्थं ब्रिटेन्-शासनं विरुद्धय कठिनतरंसङ्घर्षमकरोत्। मया यानि तथ्यानि अत्रोपस्थापितानि तेषां सूची अतितरां दीर्घास्ति।

आदिवासिसमुदायस्य एतादृन्शि बहूनि उदाहरणानि सन्ति यानि अस्मान् शिक्षयन्ति यत् प्रकृत्या सार्धं सामञ्जस्यं स्थापयित्वा कथं जीवितव्यम् ? तथा च, साम्प्रतं अस्माकं पार्श्वे या अरण्य-सम्पदोह्यवशिष्टाः, तदर्थं देशोह्ययम् अस्मदीयानाम् आदिवासिनां ऋणी एव। आगच्छन्तु ! वयं तान् प्रति आदर-भावं प्रकटयेम।

मम प्रियाः देशवासिनः,'मन की बात'-प्रसारणे वयं तासां व्यक्तीनां संस्थानाञ्च विषये चर्चां कुर्मः ये हि समाज-हितार्थं किञ्चिद् असाधारण-कार्यं कुर्वन्ति। तादृन्शिकार्याणि यानि अवलोकनेन तु साधारणानि प्रतीयन्ते परञ्च वस्तुतस्तु तानि गभीरतया प्रभावकाणि सन्ति- अस्माकं मानसिकतायाः परिवर्तनार्थं, समाजस्य च दिशा-परिवर्तनार्थम्। कतिपयेभ्यो दिनेभ्यः प्रागहं, पञ्जाबस्य कृषकस्य भ्रातुः गुरबचन-सिंह-वर्यस्य विषये पठन् आसम्। सामान्यस्य परिश्रमिणश्च कृषकस्य गुरबचनसिंह-महोदयस्य पुत्रस्य विवाहः आसीत्। अस्माद् विवाहात् प्राक्, गुरबचन-वर्यः वध्वोः पितरौ अवोचत् यत् वयं निराडम्बरतया विवाहं करिष्यामः। वरयात्रिकाः वा स्युः आहोस्वित् अन्यानि वस्तूनि वा भवेयुः, नाधिकस्य व्यय-करणस्य आवश्यकतास्ति। एनं नितरां सरलावसरमेव धारयितुं वाञ्छामः, ततः परं सहसा ते अब्रुवन् यत् 'परञ्च अस्मदीयः एकः समयः वर्तते' तथा चाद्यत्वे विवाहावसरे समयस्य कथा उपस्थाप्यते तदा सामान्यतया प्रतीयते यत् प्रतिपक्षी किञ्चित् बृहदभियाचनम् उपस्थापयिष्यति। कानिचित् तादृन्शि वस्तूनि अभियाचिष्यते यद्धि स्यात् पुत्र्याः कुटुम्ब-जनानां कृते काठिन्यकराणि भवेयुः, परन्तु भवन्तः एतज्-ज्ञात्वा आश्चर्यमनुभविष्यन्ति। अयं भ्राता गुरबचन-सिंह-वर्यःआसीत् सरलः कृषकः, सः वध्वाः पितरमवादीत्, यं समयमुपास्थापयत्, सोह्यस्माकं समाजस्य यथार्था शक्तिरस्ति। गुरबचनसिंह-महोदयः तमवादीत्- 'भवान् मह्यं वचनं ददातु यदितः परं कृषिक्षेत्रे पराली-ति पाकावशिष्टानि तृणानि नैव दाहयिष्यति' इति। किं भवन्तः कल्पयितुं शक्नुवन्ति यत् अस्मिन् कियती महती सामाजिक-शक्तिरस्ति। गुरबचनसिंह-वर्यस्य उक्तिरियम् आपाततः सामान्या प्रतीयते परञ्चेयं द्योतयति यत्तस्य व्यक्तित्वं कियत् विशालम् ? वयम् अवलोकयामः यत् अस्माकं समाजे तादृन्शि बहूनि कुटुम्बानि भवन्ति यानि वैयक्तिकान् प्रसङ्गान् समाजहितकर-प्रसङ्गत्वेन परिवर्तयन्ति। श्रीमतो गुरबचनसिंहस्य कुटुम्बेन अस्मत्-समक्षम् उदाहरणम् उपस्थापितम्। अहं पञ्जाबस्य कल्लर-माजरेति अपर-ग्राम-विषयेह्यपि अपठम्, यो हि नाभातः समीपे एवास्ति। कल्लर-माजरा-ग्रामः एतदर्थं चर्चितः अभवत् यतो हि अत्रत्याः कृषकाः कैदार-ग्रासस्य दाहनापेक्षया पाकावशिष्टानि तृणानि क्षेत्र-भूमौ एव मिश्रयन्ति, एतदर्थञ्च आवश्यकं प्रविधिमपि नूनं प्रयुञ्जन्ति। भ्रात्रे गुरबचनसिंह-वर्याय वर्धापनानि। कल्लरमाजरा-वास्तव्येभ्यः तत्रत्येभ्यः सर्वेभ्यश्चापि वर्धापनानि ये हि वातावरणं स्वच्छतरं सन्धारयितुं सर्वात्मना सततं प्रयतन्ते। भवन्तः सर्वे स्वस्थायाः जीवनशैल्याः भारतीय-रिक्थं प्रामाणिकोत्तराधिकारिरूपेण अग्रे सन्नयन्ति। यथा बिन्दु-समूहेन सागरः समुद्भवति तथैव, लघु-लघुभिः जागरुकैः सक्रियं सकारात्मक-कार्यैश्च सदा रचनात्मकं परिवेशं रचयितुं महती भूमिका निर्वाह्यते।

मम प्रियाः देशवासिनः, अस्मदीयेषु ग्रन्थेषु निगदितम्:-

ॐ द्यौः शान्तिः अन्तरिक्षं शान्तिः,
पृथिवी शान्तिःआपःशान्तिःऔषधयःशान्तिः।
वनस्पतयःशान्तिःविश्वेदेवाःशान्तिःब्रह्मशान्तिः,
सर्वंशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि।।
ॐ शान्तिः शान्तिः शान्तिः ।।

अर्थात् हेईश्वर ! लोक-त्रयेह्यपि सर्वत्र शान्तिः प्रसरेत्, जले,पृथिव्यां, आकाशे,अन्तरिक्षे, अग्नौ,पवने,औषधिषु, वनस्पतिषु,उपवने,अवचेतनेषु, सम्पूर्ण-ब्रह्माण्डे च शान्तिं प्रतिष्ठापयतुः प्रत्येकमपि जीवात्मनि,हृदये, मयि, त्वयि, जगतः प्रत्येकमपि कणे, सर्वत्र शान्तिं प्रतिष्ठापयतु

ॐ शान्तिः शान्तिः शान्तिः।।

यदा कदापि विश्वशान्तेः चर्चा भवति, तदा विषयेह्यस्मिन् भारतस्य नाम योगदानञ्च स्वर्णाक्षरैः अङ्कितं द्रक्ष्यते। भारतस्य कृते ऐषमः नवम्बर-मासीयस्य एकादश-दिनस्य विशिष्टं महत्वं वर्तते यतो हि शत-वर्षेभ्यः प्राक् अस्मिन्नेव दिने प्रथम-विश्वयुद्धंसमाप्तम्, तस्याः समाप्तेः शतं वर्षाणि पूर्णतां यान्ति अर्थात् तत्रान्तरे दुरापन्नस्य बृहद्-विनाशस्य जनहानेश्च समाप्तेरपि शती पूर्णा भविता। भारतस्य कृते प्रथम-विश्वयुद्धं हि महत्वाधायिनी घटनासीत्। यथार्थतया ब्रूमश्चेत् तेन युद्धेन साकमस्मदीयः न कश्चन साक्षात् सम्बन्धः। एवं सत्यपि,अस्मदीयाः सैनिकाः वीरता-पुरस्सरम् अयुध्यन्त, महतीं भूमिकां निरवाहयन्,सर्वोच्चञ्चबलिदानमकुर्वन्। भारतीय-सैनिकाः विश्वं प्रदर्शितवन्तः यत् युद्ध-कथा यदा यदा प्रवर्तेत तदा ते न केभ्यश्चिदपि पश्चवर्तिनो वर्तन्ते।

अस्मदीयाः सैनिकाः दुर्गमक्षेत्रेषु, विषमासु परिस्थितिषु चापि स्वीयं शौर्यं प्रदर्शितवन्तः। एतेषां सर्वेषामपि कृते आधार -भूतमेकमेव उद्देश्यमासीत् - शान्तेः पुनः स्थापना।प्रथम-विश्वयुद्धे संसारः विनाश-ताण्डवमवालोकयत्। अनुमानानुसारेण प्रायेण कोटिः सैनिकाः, प्रायेण एतावन्तश्च नागरिकाः विगत-प्राणाः जाताः। अमुना अशेष-विश्वं, किं नाम शान्तेः महत्वमिति अवागच्छत्। विगतेषु शत-वर्षेषु शान्तेः परिभाषा परिवर्तिता। अद्यत्वे शान्ति-सौहार्दयोः अर्थः केवलं युद्धस्य अभावः एव नैवास्ति। आतङ्कवादतः आरभ्य जलवायु-परिवर्तनम्, आर्थिक-विकासतः सामाजिक-न्यायः - चैतेषां सर्वेषां कृते वैश्विक-सहयोगेन समन्वयेन च सार्धं कार्यानुष्ठानस्य आवश्यकता वर्तते। निर्धनतमस्य जनस्य विकासः एव शान्तेः यथार्थ-प्रतीकोह्यस्ति।

मम प्रियाः देशवासिनः,अस्मदीयस्य पूर्वोत्तर-क्षेत्रस्य कथा काचिद् भिन्नैवास्ति। पूर्वोत्तरस्य प्राकृतिकं सौन्दर्यमनुपमम्, अत्रत्याश्च जनाः अतितरां प्रतिभाशालिनो विद्यन्ते। अस्मदीयं पूर्वोत्तरक्षेत्रं साम्प्रतं सर्व-विधोत्कृष्ट-कार्याणां कृतेह्यपि विख्यातमस्ति। पूर्वोत्तरं तादृशमेकं क्षेत्रमस्ति येन जैव-कृषि-क्षेत्रेह्यपि भूयसी उन्नतिः विहिता। केभ्यश्चित् दिनेभ्यः प्राक् सिक्किमेन संधारणीय-खाद्य-पद्धतये प्रोत्साहन-प्रदानार्थं प्रतिष्ठितः ऐषमः 'Future Policy Gold-नामा पुरस्कारो विजितः। पुरस्कारोह्ययं सयुंक्त-राष्ट्र-सङ्घेन संयुतस्य F.A.O-इति खाद्य-कृषि-सङ्घटनस्य पक्षतः प्रदीयते। एतज्-ज्ञात्वा भवन्तः प्रसन्नतामनुभविष्यन्ति यत् क्षेत्रेह्यस्मिन् उत्कृष्ट-नीति- निर्माणार्थं प्रदीयमानोह्ययं पुरस्कारः ओस्कर-सदृशः अस्ति। एतावता एव नालम्, अस्मदीयेन सिक्किमेन पञ्चविंशतेः देशानां एक-पञ्चाशत्-नामाङ्कन-नीतीः पराजित्य पुरस्कारोह्ययं विजितः, एतदर्थमहं सिक्किम-जनेभ्यः भूयान्सि अभिनन्दनानि व्याहरामि।

मम प्रियाः देशवासिनः, समाप्त-प्रायोह्ययम् ओक्टोबर-मासः। ऋतावपि भूयः परिवर्तनमनुभूयते। साम्प्रतं शीत-कालः आरभत, तथा च, ऋतु-परिवर्तनेन साकमेव उत्सवानामपि ऋतुः समागतोह्यस्ति। धनतेरस-दीपावली-भ्रातृद्वितीया-सूर्यषष्ठी-प्रभृति-विषये कथ्यते चेत् नवम्बर-मासः उत्सवानामेव मासोह्यस्ति। भवद्भ्यः सर्वेभ्यः देशवासिभ्यः एतेषां निखिलानां समुत्सवानां कृते अनेकाः शुभकामनाः।

भवतः सर्वान् साग्रहमहं कथयामि यत् भवन्तः सर्वे उत्सव-कालेह्यस्मिन् आत्मनोह्यवधानं सन्धारयेयुः, स्वीय-स्वास्थ्यस्य समाज-हितानाञ्चापि ध्यानमादध्युः। विश्वसिमि यदयं समुत्सव-कालः नूतन-सङ्कल्पस्य नवीन-निर्णयानाञ्च अवसरः।अयञ्च समुत्सव-कालः भवतां जीवनेऽपिmission mode- इति लक्ष्यावाप्तये अग्रेगमनस्य, दृढसङ्कल्पाधानस्य च, अवसरः भवेत्। भवतां प्रगतिः देशस्य प्रगतेः महत्त्वाधायी अंशोह्यस्ति । भवतां यावती अधिकतरा प्रगतिः भविष्यति, तावती एव देशस्य प्रगतिः सेत्स्यति । भवद्भ्यः सर्वेभ्यः मम भूरि भूरि शुभकामनाः। कोटिशो धन्यवादाः।

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# वर्तमानशिक्षा एवं वेदाः- अन्ताराष्ट्रिया संगोष्ठी सम्पन्ना

नवदेहली। अन्ताराष्ट्रिय आर्य महासम्मेलन (2018) दिल्ली, भारतं पी.जी.डी.ए.वी. (सांध्य) कॉलेज दिल्ली, विश्वविद्यालय एवं सार्वदेशिक आर्य प्रतिनिधि सभायाः संयुक्त तत्वावधाने अक्टुबर मासस्य 27-28 तमे दिनांके वर्तमान शिक्षा एवं वेदं विषये द्विदिवसीय अन्ताराष्ट्रिय



शोध शंगोष्ठ्याः आयोजन अभवत्। येषु उद्घाटन व समापन पत्रं मेलयित्वा प्रायस षड् सत्रेषु आधुनिक शिक्षायां वेदस्य महत्वं संगणके संस्कृतस्य प्रासंगिकता यज्ञ-विज्ञान एवं पर्यावरण वैदिक राष्ट्रवाद एवं महर्षि दयानन्द इत्यादि विषयेषु देश एवं विदेशतः समागतः विद्वान्सः एवं शोधछात्राः स्व शोधपत्रं प्रस्तुतवान। यस्योद्घाटने अध्यक्ष रूपे पतञ्जलि विश्वविद्यालयस्य उपकुलपति प्रो. महावीरअग्रवास वेदस्य महत्ता विषये उक्त्वा उक्तवान भारतस्य संस्कृतिः संस्कृतेरस्ति। मुख्यातिथि प्रो. रमेशभारद्वाजः भारतीय समाज एवं वेदस्य एकरूपता विषये उक्तवान। पी.जी.डी.ए.वी. प्राचार्य रवीन्द्रगुप्ता उक्तवान् यत् वैदिक शिक्षायाः अभावे वर्तमान शिक्षायाः न्युनता दृष्टिगोचरो भवति। डॉ. सुरेन्द्र शर्मा, संगोष्ठ्या संयोजक डॉ. सत्यकाम शर्मा, श्रीयोगेशशर्मा उपस्थित्यां वर्तमान शिक्षा एवं वेदः नामक पुस्तकस्य विमोचनकरोत्।

समापन सत्रे प्रसिद्ध वैज्ञानिक ओमप्रकाशपाण्डेय उक्तवान यत् शिक्षके आचार्यत्वं नास्ति। अग्रिम सत्रे वेव्सस्य अध्यक्षा डॉ. निष्ठा तिवारी उक्तवती यत् वेदस्य ज्ञानस्य संयोजनं अत्यावश्यकमा तदेव समृद्ध भारतस्य निर्माणं भविष्यति। पाणिनि अष्टाध्यायी संगणकाय सक्षमोऽस्ति।

अस्मिन अवसरे निष्ठातिवारी, आचार्य सनत्कुमारः डॉ. अन्नपूर्णा, डॉ.इन्द्राणि , यु.एस.ए तः डॉ अपर्णा धीर, डॉ. संध्या राठौर, डॉ. सोमवीरआर्य, डॉ. विश्वेसवाग्भि, आदि अस्मिन् विषये स्व शोध पत्रं प्रस्तुतवन्तः। अस्मिन्नवसरे संस्कृत विभागस्य डॉ. राजेशकुमार डॉ. अंकुरत्थान शुश्रीश्रुतिशर्मा, डॉ. पुनीतचांदला, श्री आदित्य प्रताप सिंह, डॉ. मोनिकानामवाल, डॉ. मयंक पाण्डेय, शुश्री गरिमा भारद्वाज व अन्य छात्र अर्जुन, मिन्टु, अर्चना व सौरभ आदि सर्वेषां विशेष योगदानमासीत्।



नवम्यामवसरे प्राचीन अवधूत मण्डलाश्रमे गुरूदेव ब्रह्मलीन महंत स्वामी हंसप्रकाश योग एवं प्राकृति चिकित्सालय एवं शोधसंस्थानस्य शुभारम्भः उत्तराखण्ड सर्वकारे कैबिनेट मंत्री श्रीमदकौशिक महोदयस्य करकमलेन अभवत्। अस्मिन्नवसरे पूर्व मेयर श्री मनोज गर्ग, उत्तराखण्डसंस्कृतअकादम्याः उपाध्यक्ष श्रीप्रेमचन्द्रशास्त्री एवं पूज्यसंत महामण्डलेश्वर गाणोऽपि भागिर्वादं प्रदत्तवान।

# बालिकाशिक्षाम, स्वच्छपर्यावरणं आर्यसमाजः वर्धितवान्-राजनाथः

नवदेहली। केन्द्रियगृहमंत्री राजनाथसिंह समाजसुधारक स्वामीदयानन्द सरस्वती महोदस्य योगदानं प्रशंसां कृत्वा उक्तवान यत् तेषां संगठनम् आर्यसमाजः बालिका शिक्षा एवं पर्यावरण विषये कार्यं करोति। सिंहः चतुर्विदसीय अस्य सम्मेलनस्य मुख्यातिथि आसीत् ते उक्तवन्तः



भारतस्य शक्ति, भारतस्य संगठनम् भारतीयता अस्ति। इदं संस्कृतिक एकतायामस्ति। देशस्य समस्यायाः समाधानाय संगठनस्य योगदानाय धन्यवादं दत्तवान। उक्तवान यत् अत्र वशुधैव कुटुम्बकम् इति अवधारणा वर्तते। प्राचीनकाले ऋषयः मानवतायाः संदेशं प्रसारितवन्तः। संस्कृतेः प्रसारं सम्पूर्ण विश्वे कृतवन्तः आर्यसमाजस्य संस्थापक महर्षि दयानन्दसरस्वती महोदयस्य योगदानस्य प्रशंसां कृत्वा उक्तवान यत् आर्यसमाजः संगठनं न अपितु विचारोऽति। एते समाजे जागरूकता उत्पादितवान। ये उदारवादी सन्ति ते एव आध्यात्मिकः अन्यः न। ते उक्तवन्तः वशुधैव कुटुम्बकम् इत्यस्य आशयोऽस्ति सर्वेषां कल्यानम्। इदानीं प्रदूषणं समस्या वर्तते विश्वे अस्योपरि चर्चा प्रचलति दयानन्द अनेन कारणेन हवन करणाय उक्तवान। वृक्षसंवर्धनम्, वालिकाशिक्षा, पर्यावरणरक्षा एते भारतीय संस्कृतिषु पूर्वमेवासीत्। ते उक्तवन्तः भारतस्य संस्कृति विश्वस्य महानतम संस्कृति वर्तते। भारतीय संस्कृतिषु अत्याधुनिकता वर्तते। विश्वे अद्यापि वेद सदृश ज्ञानं नास्ति।



28.10.2018 तमे दिनांके गांधी नगरे कडीसर्वविश्वविद्यालयै प्रसिद्ध संस्कृतकविना डा.हर्षदेव माधवेन देववाणीपरिषदा 140 तमग्रन्थरूपेण प्रकाशितः किंच रमाकान्तशुक्लेन प्रणीतः'कान्तकाव्यांजलिः' लोकायार्पितः। उत्तर गुजरात वि.वि.पूर्व कुलपतिः किंच संस्कृतकविः डा.अंबालाल प्रजापतिःआध्यक्ष्यमकरोत्। कामधेनु वि.वि.कुलपतिः,बालविश्वविद्यालयस्य पूर्व कुलपतिः श्री हर्षदभाई शाहः किंच डा.योगिनी व्यासमहोदयया उपस्थिता आसन्।


पाठकानां कृते सूचनाः-

कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते।

वित्तकोषविवरणम्-

Sanskrit samvad,
Current A/C No. 22490200000142,
Indian Overseas Bank, Yamuna Vihar, Delhi-110053
IFC Code- IOBA0002249



अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,